## पाद ।।१।।
## Pāda 1

अथ योगानुशासनम् ।।१।।
Atha yoga anūśāsanam

योगश्चित्तवृत्तिनिरोधः ।।२।।
Yogaś chitta vṛtti nirodhaḥ

तदा द्रष्टुः स्वरूपेवस्थानम् ।।३।।
Tadā draṣṭuḥ svarūpe avasthānam

वृत्तिसारूप्यमितरत्र ।।४।।
Vṛtti sārūpyam itaratra

वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ।।५।।
Vṛttayaḥ pañchatayyaḥ kliṣṭākliṣṭāḥ

प्रमणाविपर्ययविकल्पनिद्रास्मृतयः ।।६।।
Pramaṇa viparyaya vikalpa nidrā smṛtayaḥ

प्रत्यक्षानुमानागमाः प्रमाणानि ।।७।।
Pratyakṣa anumāna āgamāḥ pramāṇāni

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ।।८।।
Viparyayo mithyā jñānam atad rūpa pratiṣṭham

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ।।९।।
Śabda jñāna anupātī vastu śūnyo vikalpaḥ

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ।।१०।।
Abhāva pratyaya alambanā vṛttir nidrā

अनुभूतविषयासंप्रमोषः स्मृतिः ।।११।।
Anubhūta viṣaya asaṃpramoṣaḥ smṛtiḥ

अभ्यासवैराग्याभ्यं तन्निरोधः ।।१२।।
Abhyāsa vairāgyābhyāṃ tannirodhaḥ

तत्र स्थितौ यत्नोभ्यासः ।।१३।।
Tatra sthitau yatno abhyāsaḥ

स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ।।१४।।
Sa tu dīrgha kāla nairantarya satkāra āsevito dṛḍha bhūmiḥ

दृष्टनुश्रविकविषयवितृष्णास्य वशीकारसंज्ञा वैराग्यम् ।।१५।।
Dṛṣṭa anuśravika viṣaya vitṛṣṇasya vaśīkāra saṃjña vairāgyam

तत्परं पुरूषख्यातेर्गुणवैतृष्णयम् ।।१६।।
Tat paraṃ purūṣa khyāter guṇavaitṛṣṇyam

वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः ।।१७।।
Vitarka vichāra ānanda asmita rūpa anugamāt samprajñātaḥ

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोन्यः ।।१८।।
Virāma pratyaya abhyāsa pūrvaḥ saṃskāra śeṣaḥ anyaḥ

भवप्रत्ययो विदेहप्रकृतिलयानाम् ।।१९।।
Bhava pratyayo videha prakṛti layānām

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ।।२०।।
Śraddhā vīrya smṛti samādhi prajñā pūrvaka itareṣām

तीव्रसंवेगानामासन्नः ।।२१।।
Tīvra saṃvegānāṃ āsannaḥ

मृदुमध्याधिमात्रत्वात्ततोपि विशेषः ।।२२।।
Mṛdu madhya adhimātratvāt tato api viśeṣaḥ

ईश्वरप्रणिधानाद्वा ।।२३।।
Īśvara praṇidhānād vā

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।।२४।।
Kleśa karma vipāka āśayair aparā mṛṣṭaḥ puruṣa viśeṣa īśvaraḥ

तत्र निरतिशयं सर्वज्ञबीजम् ।।२५।।
Tatra niratiśayaṃ sarvajña bījam

स पूर्वेषामपि गुरुः कालेनानवच्छेदात् ।।२६।।
Sa pūrveṣām api guruḥ kālena anavachchhedāt

तस्य वाचकः प्रणवः ।।२७।।
Tasya vāchakaḥ praṇavaḥ

तज्जपस्तदर्थभावनम् ।।२८।।
Tat japas tat artha bhāvanam

ततः प्रत्यक्चेतनाधिगमोप्यन्तरायाभावश्च ।।२९।।
Tataḥ pratyak chetana adhigamaḥ api antarāya abhāvaś cha

व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्ध
भूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेन्तरायाः ।।३०।।

Vyādhi styāna saṃśaya pramāda ālasya avirati bhrānti
darśana alabdha bhūmikatva anava sthitatvāni chitta
vikṣepās te antarāyāḥ

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ।।३१।।
Duḥkha daurmansya aṅgame jayatva śvāsa praśvāsā
vikṣepa saha bhuvaḥ

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ।।३२।।
Tat pratiṣedha artham eka tattva abhyāsaḥ

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां
भावनातश्चित्तप्रसादनम् ।।३३।।
Maitrī karuṇā mudita upekṣāṇāṃ sukha duḥkha
puṇyāpuṇya viṣayāṇaṃ bhāvanātaś chitta prasādanam

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ।।३४।।
Prachchhardana vidhāraṇā bhyāṃ vā prāṇasya

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ।।३५।।
Viṣayavatī vā pravṛttir utpannā manasaḥ sthiti nibandhanī

विशोका वा ज्योतिष्मती ।।३६।।
Viśokā vā jyotiṣmatī

वीतरागविषयं वा चित्तम् ।।३७।।
Vīta rāga viṣayaṃ vā chittam

स्वप्ननिद्राज्ञानालम्बनं वा ।।३८।।
Svapna nidrā jñāna ālambanaṃ vā

यथाभिमतध्यानाद्वा ।।३९।।
Yatha abhimata dhyānād vā

परमाणुपरममहत्त्वान्तोस्य वशीकारः ।।४०।।
Paramāṇu parama mahattva anta asya vaśīkāraḥ

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ।।४१।।
Kṣīṇa vṛtter abhijātasya iva maṇer grahītṛ
grahaṇa grāhyeṣu tatstha taddañjanatā samāpattiḥ

तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ।।४२।।
Tatra śabda artha jñāna vikalpaiḥ saṃkīrṇā savitarkā samāpattiḥ

स्मृतिपरिशुद्धौ स्वरूपशुन्येवार्थमात्रनिर्भासा निर्वितर्का ।।४३।।
Smṛti pariśuddhau svarūpa śūnya iva artha mātra
nirbhāsā nirvitarkā

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ।।४४।।
Etaya eva savichārā nirvichārā cha sūkṣma viṣayā vyākhyātā

सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ।।४५।।
Sūkṣma viṣayatvaṃ cha aliṅga paryavasānam

ता एव सबीजः समाधिः ।।४६।।
Tā eva sabījaḥ samādhiḥ

निर्विचारवैशारद्येध्यात्मप्रसादः ।।४७।।
Nirvichāra vaiśāradye adhyātma prasādaḥ

ऋतम्भरा तत्र प्रज्ञा ।।४८।।

Ṛtam bharā tatra prajñā

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ।।४९।।

Śruta anumāna prajñā bhyām anya viṣayā viśeṣa arthatvāt

तज्जः संस्कारोन्यसंस्कारप्रतिबन्धी ।।५०।।

Tajjaḥ saṃskāra anya saṃskāra pratibandhī

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ।।५१।।

Tasya api nirodhe sarva nirodhān nirbījaḥ samādhiḥ

## पाद ।।२।।

## Pāda 2

तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ।।१।।

Tapaḥ svādhāya īśvara praṇidhānāni kriyā yogaḥ

समाधिभावनार्थः क्लेशतनुकरणार्थश्च ।।२।।

Samādhi bhāvanārthaḥ kleśa tanūkaraṇārtha cha

अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ।।३।।

Avidyā asmitā rāga dveṣa abhiniveśaḥ kleśāḥ

अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ।।४।।

Avidyā kṣetram uttareṣāṃ prasupta tanuvichchhinna udārāṇām

अनित्याशुचिदुः खानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ।।५।।

Anitya aśuchi duḥkha anātmasu nitya śuchi sukha
ātma khyātir avidyā

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ।।६।।

Dṛg darśana śaktyor ekātmatā iva asmitā

सुखानुशयी रागः ।।७।।

Sukha anuśayī rāgaḥ

दुःखानुशयी द्वेषः ।।८।।

Duḥkha anuśayī dveśaḥ

स्वरसवाही विदुषोपि तथारूढोभिनिवेशः ।।९।।

Svarasa vāhī viduṣo api tathā rūḍho abhiniveśaḥ

ते प्रतिप्रसवहेयाः सूक्ष्माः ।।१०।।

Te pratiprasava heyāḥ sūkṣmāḥ

ध्यानहेयास्तद्वृत्तयः ।।११।।

Dhyāna heyāḥ tad vṛttayaḥ

क्लेशमुलः कर्माशयो दृष्टाजन्मवेदनीयः ।।१२।।

Kleśa mūlaḥ karma aśayo dṛṣṭā adṛṣṭa janma vedanīyaḥ

सति मूले तद्विपाको जात्यायुर्भोगाः ।।१३।।

Sati mūle tad vipāko jāti āyuḥ bhogāḥ

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ।।१४।।

Te hlāda paritāpa phalāḥ puṇya apuṇya hetutvāt

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ।।१५।।

Pariṇāma tāpa saṃskāra duḥkhair guṇa vṛtti virodhāt cha
duḥkham eva sarvaṃ vivekinaḥ

हेयं दुःखमनागतम् ।।१६।।
Heyaṃ duḥkham anāgatam

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ।।१७।।
Draṣṭṛ dṛśyayoḥ saṃyogaḥ heya hetuḥ

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ।।१८।।
Prakāśa kriyā sthiti śīlaṃ bhūta indriya ātmakaṃ bhoga apavarga arthaṃ dṛśyam

विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ।।१९।।
Viśeṣa aviśeṣa liṅga mātra aliṅgāni guṇa parvāṇi

द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः ।।२०।।
Draṣṭā dṛśi mātraḥ śuddho api pratyaya anupaśyaḥ

तदर्थ एव दृश्यस्यात्मा ।।२१।।
Tad artha eva dṛśyasya ātmā

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ।।२२।।
Kṛta arthaṃ prati naṣṭam api anaṣṭaṃ tad anya sādhāraṇatvāt

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ।।२३।।
Sva svāmi śaktyoḥ svarūpa upalabdhi hetuḥ saṃyogaḥ

तस्य हेतुरविद्या ।।२४।।
Tasya hetur avidyā

तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ।।२५।।
Tad abhāvāt saṃyoga abhāvo hānaṃ tad dṛśeḥ kaivalyam

विवेकख्यातिरविप्लवा हानोपायः ।।२६।।
Viveka khyātir aviplavā hānopāyaḥ

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ।।२७।।
Tasya saptadhā prānta bhūmiḥ prajñā

तोगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः ।।२८।।
Yoga aṅga anuṣṭhānād aśuddhi kṣaye jñāna dīptir
ā viveka khyāteḥ

यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्योष्टावङ्गानि ।।२९।।
Yama niyama āsana prāṇāyāma pratyāhāra dhāraṇā dhyāna

तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाः ।।३०।।
Tatra ahiṃsā satya asteya brahmacharya aparigrahā yamāḥ

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ।।३१।।
Jāti deśa kāla samaya anavachchhinnāḥ sārva baumā mahā vratam

शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः ।।३२।।
Śaucha saṃtoṣa tapaḥ svādhyāya īśvara praṇidhānāni niyamāḥ

वितर्कबाधने प्रतिपक्षभावनम् ।।३३।।
Vitarka bādhane pratipakṣa bhāvanam

वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका
मृदुमध्याधिमात्रा दुःखाज्ञनानन्तफला इति प्रतिपक्षभावनम् ।।३४।।
Vitarkā hiṃsādayaḥ kṛta kārita anumoditā lobha krodha moha
pūrvakā mṛdu madhya adhimātrā duḥkha ajñana ananta
phalā iti pratipakṣa bhāvanam

अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः ।।३५।।
Ahiṃsā pratiṣṭhāyāṃ tat saṃnidhau vaira tyāgaḥ

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ।।३६।।
Satya pratiṣṭhāyāṃ kriyā phala aśrayatvam

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ।।३७।।
Asteya pratiṣṭhāyāṃ sarva ratna upasthānam

ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ।।३८।।
Brahmacharya pratiṣṭhāyāṃ vīrya lābhaḥ

अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ।।३९।।
Aparigraha sthairye janma kathaṃtā saṃbodhaḥ

शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ।।४०।।
Śauchāt svāṅga jugupsā parair asaṃsargaḥ

सत्त्वशुद्धिसौमनस्यैकाग्रयेन्द्रियजयात्मदर्शनयोग्यत्वानि च ।।४१।।
Sattva śuddhi saumanasya ekāgraya indriya jaya ātma darśana yogyatvāni cha

संतोषादनुत्तमः सुखलाभः ।।४२।।
Saṃtoṣād anuttamaḥ sukha lābhaḥ

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ।।४३।।
Kāya indriya siddhi aśuddhi kṣayāt tapasaḥ

स्वाध्यायादिष्टदेवतासंप्रयोगः ।।४४।।
Svādhyāyād iṣṭadevatā saṃprayogaḥ

समाधिसिद्धिरीश्वरप्रणिधानात् ।।४५।।
Samādhi siddhiḥ īśvara praṇidhānāt

स्थिरसुखमासनम् ।।४६।।
Sthira sukham āsanam

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ।।४७।।
Prayatna śaithilya ananta samāpattibhyām

ततो द्वन्द्वानभिघातः ।।४८।।
Tato dvandva anabhighātaḥ

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ।।४९।।
Tasmin sati śvāsa praśvāsaya gati vichchhedaḥ prāṇāyāmaḥ

बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसक्ष्मः ।।५०।।
Bāhya abhyantara stambha vṛttir deśa kāla saṃkhyābhiḥ
paridṛṣṭo dīrgha sūkṣmaḥ

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ।।५१।।
Bāhya abhyantara viṣaya ākṣepī chaturthaḥ

ततः क्षीयते प्रकाशावरणम् ।।५२।।
Tataḥ kṣīyate prakāśa āvaraṇam

धारणासु च योग्यता मनसः ।।५३।।
Dhāraṇāsu cha yogyatā manasaḥ

स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ।।५४।।
Sva viṣaya asaṃprayoge chitta svarūpa anukāra iva
indriyāṇām pratyāhāraḥ

ततः परमा वश्यतेन्द्रियाणाम् ।।५५।।
Tataḥ paramā vaśyatā indriyāṇām

## पाद ।।३।।
## Pāda 3

देशबन्धश्चित्तस्य धारणा ।।१।।
Deśa bandhaś chittasya dhāraṇā

तत्र प्रत्ययैकतानता ध्यानम् ।।२।।
Tatra pratyaya eka tānatā dhyānam

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।।३।।
Tadeva artha mātra nirbhāsaṃ svarūpa śūnyam iva smādhiḥ

त्रयमेकत्र संयमः ।।४।।
Trayam ekatra saṃyamaḥ

तज्जयात्प्रज्ञालोकः ।।५।।
Taj jayāt prajñā lokaḥ

तस्य भूमिषु विनियोगः ।।६।।
Tasya bhūmiṣu viniyogaḥ

त्रयमन्तरङ्गं पूर्वेभ्यः ।।७।।
Trayam antaraṅgaṃ pūrve bhyaḥ

तदपि बहिरङ्गं निर्बीजस्य ।।८।।
Tad api bahir aṅgaṃ nirbījasya

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो
निरोधपरिणामः ।। ९ ।।
Vyutthāna nirodha saṃskārayor abhibhava prādurbhāvau
nirodha kṣaṇa chitta anvayaḥ nirodhaḥ pariṇāmaḥ

तस्य प्रशान्तवाहिता संस्कारात् ।।१०।।
Tasya praśānta vāhitā saṃskārāt

सर्वार्थतैकाग्रतयोः क्षतोदयौ चित्तस्य समाधिपरिणामः ।। ११ ।।
Sarva artha ekāgratayoḥ kṣaya udayau chittasya
samādhi pariṇāmaḥ

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ।।१२।।
Tataḥ punaḥ śānta uditau tulya pratyayau chittasya
ekāgratā pariṇamaḥ

एतेन भूतन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ।।१३।।
Etena bhūta indriyeṣu dharma lakṣaṇā avasthā
pariṇāmā vyākhyātāḥ

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ।। १४ ।।
Śānta udita avyapadeśya dharma anupātī dharmī

क्रमान्यत्वं परिणामान्यत्वे हेतुः ।।१५।।
Krama anyatvaṃ pariṇāma anyatve hetuḥ

परिणामत्रयसंयमादतीतानागतज्ञानम् ।।१६।।
Pariṇāma traya saṃyamād atīta anāgata jñānam

शब्दार्थप्रत्ययानामितरेतराध्यासात्
संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ।।१७।।
Śabda artha pratyayānām itaretara adhyāsāt saṃkaraḥ tat
pravibhāga saṃyamāt sarva bhūta ruta jñānam

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ।।१८।।
Saṃskāra sākṣāt karaṇāt pūrva jāti jñānam

प्रत्ययस्य परचित्तज्ञानम् ॥१९॥
Pratyayasya para chitta jñānam

न च तत्सालम्बनं तस्याविषयीभूतत्वात् ॥२०॥
Na cha tat sālambanaṃ tasya aviṣayī bhūtatvāt

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुः
प्रकाशासंप्रयोगेन्तर्धानम् ॥२१॥
Kāya rūpa saṃyamāt tad grāhya śakti stambhe
chakṣuḥ prakāśa asaṃprayoge antardhānam

एतेन शब्दाद्यन्तर्धानमुक्तम् ॥२२॥
Etena śabdādi antardhānam uktam

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥२३॥
Sopakramaṃ nirupa karmaṃ cha karma tat saṃyamād
aparānta jñānam ariṣṭebhyo vā

मैत्र्यादिषु बलानि ॥२४॥
Maitrya ādiṣu balāni

बलेषु हस्तिबलादीनि ॥२५॥
Baleṣu hasti bala adīni

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहित विप्रकृष्टज्ञानम् ॥२६॥
Pravṛtti āloka nyāsāt sūkṣma vyavahita viprakṛṣṭa jñānam

भुवनज्ञानं सूर्ये संयमात् ॥२७॥
Bhuvana jñānaṃ sūrye saṃyamāt

चन्द्रे ताराव्यूहज्ञानम् ॥२८॥
Chandre tārā vyūha jñānam

ध्रुवे तद्गतिज्ञानम् ।।२९।।
Dhruve tad gati jñānam

नाभिचक्रे कायव्यूहज्ञानम् ।।३०।।
Nābhi chakre kāya vyūha jñānam

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ।।३१।।
Kaṇṭha kūpe kṣut pipāsā nivṛttiḥ

कूर्मनाड्यं स्थैर्यम् ।।३२।।
Kūrma nāḍyaṃ sthairyam

मूर्धज्योतिषि सिद्धदर्शनम् ।।३३।।
Mūrdha jyotiṣi siddha darśanam

प्रातिभाद्वा सर्वम् ।।३४।।
Prātibhād vā sarvam

हृदये चित्तसंवित् ।।३५।।
Hṛdaye chitta saṃvit

सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थात्
स्वार्थसंयमात्पुरुषज्ञानम् ।।३६।।
Sattva puruśayor atyanta asaṃkīrṇayoḥ pratyaya
aviśeṣaḥ bhogaḥ para arthāt svārtha saṃyamāt puruṣa jñanam

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ।।३७।।
Tataḥ prātibha śrāvaṇa vedana ādarśa āsvāda vārtā jāyante

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ।।३८।।
Te samādhāv upasargā vyutthāne siddhayaḥ

बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ।।३९।।
Bandha kāraṇa śaithilyāt prachāra saṃvedanāch cha
chittasya para śarīrāveśaḥ

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ।।४०।।
Udāna jayāt jala paṅka kaṇṭaka ādiṣu asaṅga utkrāntiḥ cha

समानजयाज्ज्वलनम् ।।४१।।
Samāna jayāt jvalanam

श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ।।४२।।
Śrotra akāśayoḥ saṃbandha saṃyamād divyaṃ śrotram

कायाकाशतोः संबन्धसंयमाल्लघुतूल समापत्तेश्चाकाशगमनम् ।।४३।।
Kāya akāśayoḥ saṃbandha saṃyamāt laghu tūla samāpatte
cha ākāśa gamanam

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ।।४४।।
Bahir akalpitā vṛttir mahā videhā tataḥ prakāśa āvaraṇa kṣayaḥ

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ।।४५।।
Sthūla svarūpa sūkṣma anvaya arthavattva saṃyamād
bhūta jayaḥ

ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ।।४६।।
Tataḥ aṇima ādi prādurhbāvaḥ kāya saṃpat tat dharma anabhighātaḥ cha

रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ।।४७।।
Rūpa lāvaṇya bala vajra saṃhananatvāni kāya saṃpat

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ।।४८।।

Grahaṇa svarūpa asmitā anvaya arthavattva saṃyamāt
indriya jayaḥ

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ।।४९।।

Tato mano javitvaṃ vikaraṇa bhāvaḥ pradhāna jayaś  cha

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ।।५०।।

Sattva puruṣa anyatā khyāti mātrasya sarva bhāva
adhi ṣṭhāṛtvaṃ sarva jñātṛtvaṃ cha

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ।।५१।।

Tat vairāgyād api doṣa bīja kṣaye kaivalyam

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ।।५२।।

Sthānya upanimantraṇe saṅga smaya akaraṇaṃ
punar aniṣṭa prasaṅgāt

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ।।५३।।

Kṣaṇa tat kramayoḥ saṃyamād vivekajaṃ jñānam

जातिलक्षणदेशैरन्यतानवच्छेदात् तुल्ययोस्ततः प्रतिपत्तिः ।।५४।।

Jāti lakṣaṇa deśaiḥ anyatā anavachchhedāt tulyayos
tataḥ pratipattiḥ

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ।।५५।।

Tārakaṃ sarva viṣayaṃ sarvathā viṣayam akramaṃ cha
iti vivekajaṃ jñānam

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ।। ५६ ।।

Sattva puruṣayoḥ śuddhi sāmye kaivalyam

## पाद ।।४।।

## Pāda 4

जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः ।।१।।
Janma auṣadhi mantra tapaḥ samādhijāḥ siddhayaḥ

जात्यन्तरपरिणामः प्रकृत्यापूरात् ।।२।।
Jāti antara pariṇāmaḥ prakṛti āpūrāt

निमित्तमप्रतोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ।।३।।
Nimittam aprayojakaṃ prakṛtināṃ varaṇa bhedas
tu tataḥ kṣetrikavat

निर्माणचित्तान्यस्मितामात्रात् ।।४।।
Nirmāṇa chittāni asmitā mārāt

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ।।५।।
Pravṛtti bhede prayojakaṃ chittam ekam anekeṣām

तत्र ध्यानजमनाशयम् ।।६।।
Tatra dhyāna jam anāśayam

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ।।७।।
Karma aśukla akṛṣṇaṃ yoginaḥ trividham itareṣām

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ।।८।।
Tataḥ tat vipāka anuguṇānām eva abhivyaktiḥ vāsanānām

जातिदेशकालव्यवहितानामप्यानन्तर्यं
स्मृतिसंस्कारयोरेकरूपत्वात् ।।९।।
Jāti deśa kāla vyavahitānām api ānantaryaṃ smṛti
saṃskārayoḥ eka rūpatvāt

तासामनादित्वं चाशिषोनित्यत्वात् ।।१०।।
Tāsām anāditvaṃ cha aśiṣaḥ nityatvāt

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ।।११।।
Hetu phala aśraya ālambanaiḥ saṃgṛhītatvād eṣām
abhāve tad abhāvaḥ

अतीतानागतं स्वरूपतोस्त्यध्वभेदाद्धर्माणाम् ।।१२।।
Atīta anāgataṃ svarūpataḥ asti adhva bhedāt dharmāṇām

ते व्यक्तसूक्ष्मा गुणात्मानः ।।१३।।
Te vyakta sūkṣmā guṇātmānaḥ

परिणामैकत्वाद्वस्तुतत्त्वम् ।।१४।।
Pariṇāma ekatvāt vastu tattvam

वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ।। १५ ।।
Vastu sāmye chitta bhedāt tayoḥ vibhaktaḥ panthāḥ

न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ।।१६।।
Na cha eka chitta tantraṃ vastu tad apramāṇakaṃ tadā kiṃ syāt

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ।।१७।।
Tad uparāga apekṣitvāt chittasya vastu jñāta ajñātam

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ।।१८।।
Sadā jñātāḥ chitta vṛttayas tat prabhoḥ puruṣasya apariṇāmitvāt

न तत्स्वाभासं दृश्यत्वात् ।।१९।।
Na tat sva abhāsaṃ dṛśyatvāt

एकसमये चोभयानवधारणम् ।।२०।।
Eka samaye cha ubhaya anava dhāraṇam

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ।।२१।।
Chitta antara dṛśye buddhi buddheḥ atiprasaṇgaḥ smṛti saṃkaraḥ cha

चित्तेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ।।२२।।
Chitteḥ aprati saṃkramāyāḥ tad ākārāpattau sva buddhi saṃvedanaṃ

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ।।२३।।
Draṣṭṛ dṛśya uparaktaṃ chittaṃ sarva artham

तदसंख्येयवासनाभिश्चित्तमपिपरार्थं संहत्यकारित्वात् ।।२४।।
Tat asaṃkhyeya vāsanābhiḥ chittam api para arthaṃ saṃhatya kāritvāt

विशेषदर्शिन आत्मभावभावना विनिवृत्तिः ।।२५।।
Viśeṣa darśina ātma bhāvabhāvanā vinivṛttiḥ

तदा हि विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ।।२६।।
Tadā hi viveka nimnaṃ kaivalya prāg bhāraṃ chittam

तच्छिद्रेषु प्रत्ययान्तराणिसंस्कारेभ्यः ।।२७।।
Tat chhidreṣu pratyaya antarāṇi saṃskāre bhyaḥ

हानमेषां क्लेशवदुक्तम् ।।२८।।

Hānam eṣāṃ kleśavat uktam

प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ।।२९।।

Prasaṃ khyāne api auksīdasya sarvathā viveka
khyāte dharma meghaḥ samādhiḥ

ततः क्लेशकर्मनिवृत्तिः ।।३०।।

Tataḥ kleśa karma nivṛttiḥ

तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम् ।।३१।।

Tadā sarva avaraṇa mala apetasya jñānasya ananṭyāt
jñeyam alpam

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ।।३२।।

Tataḥ kṛta arthānāṃ pariṇāma karma samāptir guṇānām

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ।।३३।।

Kṣaṇa pratiyogī pariṇāma aparānta nirgrāhyaḥ kramaḥ

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा
वा चितिशक्तिरिति ।।३४।।

Puruṣa artha śūnyānāṃ guṇānāṃ pratiprasavaḥ kaivalyaṃ
svarūpa pratiṣṭhā vā chiti śaktiḥ iti